# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – फलितज्योतिषम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – पञ्चस्वराः, नरपतिजयचर्यास्वरोदयः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ चतुर्विंशतिवर्षाणि यावद्गच्छन्ति जन्मतः।
तावदरिष्टं च निश्चित्य आयुर्दायं न चिन्तयेत्॥

२ वेदपञ्चनखान्दत्वा वह्न्यष्ट समयं तथा।
भुवनं युगलश्चैव दश देयास्तथैव च॥

३ कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम्।
जीवर्किभानुजेज्यानां क्षेत्राणि स्युरजादयः॥

४ मेषो वृषो मृगः कन्या कर्को मीनस्तुला क्रमात्।
आदित्यादिग्रहेषूच्चं नीचं तस्माच्च सप्तमम्॥

**प्रश्नः २** त्रिपताकीचक्रविचारविषये चर्चां कुरुत।

**प्रश्नः ३** अन्तर्दशासाधनं कुरुत।

**प्रश्नः ४** बालारिष्टसमयज्ञानविषये चर्चां कुरुत।

**प्रश्नः ५** आयुर्दायविचारपूर्वकं मृत्युयोगविचारं कुरुत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ दशैकेन शतं तैश्च सहस्रं शतसङ्ख्यया।
स्वरोदयबली राजा दशघ्नं हन्ति लीलया॥

२ षोडशाक्षरोऽर्काः स्यात्कादिवर्णास्तु पञ्चकम्।
चतुर्वर्गो यशौ वर्गौ सङ्ख्या वर्षेषु कीर्तिताः॥

३ अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवमृक्षस्वरोदयः ॥

४ यो यस्य सप्तमे स्थाने स स्वरो मृत्युदायकः ।
तृतीये तु भवेद्वृद्धिः शेषा मध्यफलप्रदाः ॥

प्रश्नः ७ पञ्चबालाद्यवस्थानां बलविषये चर्चां कुरुत ।

प्रश्नः ८ स्वरशास्त्रस्य महत्त्वविषये चर्चां कुरुत ।

प्रश्नः ९ दिनरात्रिदण्डेशविषये चर्चां कुरुत ।

प्रश्नः १० अर्धयामेशसाधनविषये चर्चां कुरुत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ पुनर्वसुनक्षत्रस्य स्वरः कः ?
२ मीनराशेः स्वरनाम लिखत ।
३ शुक्लपक्षस्य स्वराः के के ?
४ नरपतिजयचर्यास्वरोदयग्रन्थस्य ग्रन्थकारस्य नाम किम् ?
५ स्वराणां क्रमं लिखत ।
६ त्रिपताकीचक्रे कति रेखाः भवन्ति ?
७ ‘पञ्चस्वराः’ इत्यस्य रचनाकारः कः ?
८ बालाद्यवस्थानां नामानि लिखत ।
९ उदितादि कति संज्ञा वर्तते ?
१० महापातकयोगः कदा भवति ?
११ गुरुग्रहस्य नीचराशिः कः ?
१२ नृयुग्म अर्थात् किम् ?
१३ रिष्कः अर्थात् कः भावः ?
१४ धनराशिः कस्य ग्रहस्य मूलत्रिकोणराशिः ?
१५ बुधग्रहस्य उच्चराशिः कः ?

****